# Shiva Stuti by Matsarasura

# શિવસ્તુતિઃ મત્સરાસુરકૃતા

## Document Information

Text title : Shiva Stuti by Matsarasura

File name : shivastutiHmatsarAsurakRRitA.itx

Category : shiva

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 24

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Shiva Stuti by Matsarasura

# શિવસ્તુતિઃ મત્સરાસુરકૃતા

શ્રીગણેશાય નમઃ ।
મત્સરાસુર ઉવાચ ।
નમસ્તે ત્રિદશેશાય શઙ્કરાય શિવાય ચ ।
નિર્ગુણાય ગુણાનાં ચેશાય સર્વગુણાય તે ॥ ૧૨॥

અપારાય મહાદેવ પિનાકધર તે નમઃ ।
નમો નમો મહેશાય સર્વાધિપતયે નમઃ ॥ ૧૩॥

ઉમાકાન્ત નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
ભક્તિપ્રિયાય દેવાય સર્પહારાય તે નમઃ ॥ ૧૪॥

વૃષધ્વજાય નન્દીશવાહનાય ત્રિશૂલિને ।
ભસ્માઙ્ગરાગધારાય વ્યાઘ્રામ્બરધરાય તે ॥ ૧૫॥

ભાલચન્દ્ર નમસ્તુભ્યં પઞ્ચવક્ત્રાય શમ્ભવે ।
દશબાહુધરાયૈવ ત્રિનેત્રાય કપાલિને ॥ ૧૬॥

જટાજૂટધરાયૈવ નમો ગઙ્ગાધરાય તે ।
ગિરિશાય નમસ્તુભ્યં ગજચર્મધરાય તે ॥ ૧૭॥

સદા બ્રહ્મમયાયૈવ નમો બ્રહ્મપ્રદાયિને ।
નિરાધારાય નિત્યાય સુયોગિપતયે નમઃ ॥ ૧૮॥

અપારગુણધારાય રુદ્રાય તુ નમો નમઃ ॥

કિં સ્તૌમિ ત્વાં મહાદેવ યત્ર વેદા વિકુણ્ઠિતાઃ ॥ ૧૯॥

ઇતિ સ્તુત્વા મહેશાનં મત્સરઃ પ્રણનામ તમ્ ।
ઉત્થિતં તં શિવઃ પ્રાહ વરં વરય સુવ્રત ॥ ૨૦॥

ઇદં ત્વયા કૃતં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
પઠતે શૃણ્વતે સર્વકામદં પ્રભવિષ્યતિ ॥ ૨૧॥

વિદ્યામાયુઃ સુખં રાજ્યં પુત્રપૌત્રાદિકં ચ યત્ ।
ભુક્તિં મુક્તિ પ્રદાસ્યામિ સ્તોત્રેણ સ્તુવતેઽસુર ॥ ૨૨॥

શ્રુત્વા શિવવચો રમ્યં પ્રહૃષ્ટો મત્સરોઽબ્રવીત્ ।
વિનયાવનતો ભૂત્વા શિવ ભક્તવરપ્રદમ્ ॥ ૨૩॥

મત્સર ઉવાચ ।
યદિ દેવેશ તુષ્ટોઽસિ યદિ દાસ્યસિ મે વરાન્ ।
તદાઽભયં તે સર્વત્ર ભક્તિં દેહિ સદાશિવ ॥ ૨૪॥

પઞ્ચભૂતાત્મકં સર્વં ત્રિગુણૈઃ સુવિરાજિતમ્ ।
તસ્માન્મે મરણં શમ્ભો ન કદાચિદ્ભવેદિહ ॥ ૨૫॥

આરોગ્યાદિસમાયુક્તમૈશ્વર્યં દેહિ શાશ્વતમ્ ।
બ્રહ્માણ્ડસ્ય ચ રાજ્યં મે દેહિ દેહિ સદાશિવ ॥ ૨૬॥

મુદ્ગલ ઉવાચ ।
તસ્યૈતદ્વચનં શ્રુત્વા શિવો વિસ્મિતમાનસઃ ।
દેવાઃ સર્ષિગણાઃ સર્વે વિસ્મિતાઃ પ્રાભવન્ તદા ॥ ૨૭॥

કિમુક્તં મત્સરેણૈવં કા ગતિર્વા ભવિષ્યતિ ।
તપસોગ્રેણ સન્તુષ્ટઃ શિવસ્તં પ્રત્યુવાચ હ ॥ ૨૮॥

શિવ ઉવાચ ।
યત્ત્વયા પ્રાર્થિતં દૈત્ય તત્સર્વં તે ભવિષ્યતિ ।
ઉગ્રેણ તપસા તુભ્યં મયા દત્તં સુદુર્લભમ્ ॥ ૨૯॥

ઇતિ મત્સરાસુરકૃતા શિવસ્તુતિઃ સમાપ્તા । ૧.૨૪

*Shiva Stuti by Matsarasura*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*